तिसारशोषाश्मशामयहरस्य सः" भावप्र० । श्राद्धे तन्मांस
दाने फलभेदः श्रा० त० उक्तो यथा "ऐणरौरव
वाराहशाशैर्मांसैर्यथाक्रमम् । मासवृद्ध्याभितृप्यन्ति
दत्तैरेह पितामहाः" तन्मांसं विष्णवे देयं यथोक्तं
"मार्गं मांसं तथा छागं शाशं समनुपच्यते । एतानि
मे प्रियाणि स्युः प्रपद्यानि वसुन्धरे !" । वराहपु० २चन्द्रा-
ङ्करूपेस्तगे धराणः । ३बोले ४लोध्रे ५नरभेदे मेदि० ।
तल्लक्षणं यथा "मृदुवचनसुशीलः कोमलाङ्गः सुकेशः
सकलगुणनिधानं सत्यवादी शशोऽयम्" रतिम० ।

**शशक** पुंस्त्री० शश--स्वार्थे क । (खरगोश) पञ्चनखेषु भक्ष्ये
पशुभेदे "शशकः शल्लकी गोधा खड्गी कूर्मश्च पञ्चमः ।
भक्ष्यान् पञ्चनखेष्वाहुरनुष्ट्रांश्चैकतोदतः" मनुः ।

**शशधर** पु० शशं मृगभेदं धरति धृ-अच् । १चन्द्रे २कर्पूरे
च अमरः । भृ-क्विप् शशभृदादयोऽप्यत्र ।

**शशलाञ्छन** पु० शशः मृगभेदो लाञ्छनं यस्य । १चन्द्रे
२कर्पूरे च शशाङ्कादयोऽप्यत्र ।

**शशबिन्दु** पु० १राजभेदे २विष्णौ च मेदि० ।

**शशशिम्बिका** स्त्री शश इव शिम्बी तया कायति कै-क ।
जीवन्त्यां राजनि० । [यमुनयोर्मध्यस्थे देशभेदे त्रिका०

**शशस्थली** स्त्री शशवासयोग्या स्थली । अन्तर्वेद्यां गङ्गा-

**शशाण्डुलि** स्त्री अडि--उलि ६त०वा ङीप् । कर्कटीभेदे रा-
जनि० । "शशाण्डुली तिक्तकटुश्च कोमला कट्वम्लयुक्ता मधुरा
कफापहा । पाके तु साऽम्ला मधुरा विदाहकृत् कफे तु
शुष्का रुचिकृच्च दीपनी" राजनि० । [ल्युः । तत्रैव ।

**शशाद** पु० शशमत्ति अद्-अण् । श्येनविहगे राजनि० ।

**शशिकला** स्त्री ६त० । १चन्द्रस्य षोड़शभागे "गुरुनिधनमनु-
लघुरिह शशिकला" छन्दोम० उक्तलक्षणे २पञ्चदशाक्ष-
रपादके छन्दोभेदे । [मणौ पु० राजनि० ।

**शशिकान्त** न० शशी कान्तो यस्य । १कुमुदे २चन्द्रकान्त-

**शशिन्** पु० शशोऽस्त्यस्य इनि । १चन्द्रे २कर्पूरे च शब्दमा० ।

**शशिप्रभ** न० शशिना प्रभा स्येव वा प्रभा यस्य । १कुमुदे ।२मु-
क्तायां राजनि० । ६त० ३ज्योत्स्नायां जटा० । [दयोऽप्यत्र ।

**शशिभूषण** पु० शशी भूषणं यस्य । १महादेवे शशिमण्डना-

**शशिलेखा** स्त्री शशिनो रेखा रस्य लः । १चन्द्रकलायां
शशिनो लेखेव रूक्षतास्पदत्वात् । २गुडूच्यां मेदि० ।
"मौ मो यौ चेत् भवेतां सप्ताष्टकैश्चन्द्रलेखा" छन्दोम०
उक्तलक्षणे ३पञ्चदशाक्षरपादके छन्दोभेदे । [राजनि० ।

**शशिवाटिका** स्त्री शशिनो वाटीव इवार्थे कन् । पुनर्नवायां

**शशिशेखर** पु० शशी शेखरं यस्य । महादेवे हला० शशि-
मल्लादयोऽप्यत्र ।

**शशोर्ण** न० ६त० । शशस्य लोम्नि अमरः । [अमरः ।

**शश्वत्** अव्य० शश- वति । १नैरन्तर्ये २पुनःपुनरित्यर्थे च

**शष** वधे भ्वा० पर० सक० सेट् । शषति अशाषीत् अशषीत् ।

**शष्कुल** पु० शष--कुलच् कस्य नेत्त्वम् । ( डहरकरमचा )
१दृक्षे २अपूपभेदे स्त्री शब्दच० गौरा० ङीष् । ३कर्ण-
रन्ध्रे "अवलम्बितकर्णशष्कुली" नैष० । ४मत्स्य-
भेदे च भावप्र० दन्त्यमध्योऽप्ययमत्रार्थे । [मेदि० ।

**शष्प** न० शष--पक् । १बालतृणे घासे अमरः २प्रतिभाक्षये पु०

**शस** वधे भ्वा० पर० सक० सेट् उदित् क्त्वा वेट् । शसति ।
अशासीत् अशसीत् ।

**शंस** आशिषि भ्वा० आत्म० सक० इदित् सेट् । प्रायेणाङ्-
पूर्वः । आशंसते आशंसिष्ट ।

**शंस** स्तुतौ अदा० पर० सक० सेट् इदित् । शंस्ति अशंसत् ।

**शसन** न० शस--वधे ल्युट् । यज्ञार्थं पशुहनने ।

**शस्त** न० शंस--क्त । १कल्याणे २तद्वति अमरः । ३स्तुते
४प्रशस्ते च त्रि० मेदि० । ५देहे न० त्रिका० संज्ञायां कन् ।
६अङ्गुलित्राणे शब्दच० ।

**शस्त्र** न० शस--ष्ट्रन् । १लौहे २खड्गादौ अस्त्रे च हेमच०
स्वार्थे क । तत्रैव । तत्र मुक्तमस्त्रममुक्तं शस्त्रमिति भेदः
शंस--त्रन् । ३प्रगीते मन्त्रभेदे चिकित्साङ्गशस्त्राणां ल-
क्षणादि सुश्रुतोक्तं यथा
"अथातःशस्त्रावचारणीयमध्यायं व्याख्यास्यामः विंशतिः
शस्त्राणि । तद्यथा मण्डलाग्रकरपत्रवृद्धिपत्रनखशस्त्र-
मुद्रिकोत्पलपत्रकार्द्धधारसूचीकुशपत्राटीमुखशरारीमुखा-
न्तर्मुखत्रिकूर्चककुठारिकाव्रीहिमुखारावेतसपत्रकवड़िश-
दन्तशङ्क्वेषण्य इति । तत्र मण्डलाग्रकरपत्रे स्यातां
छेदने लेखने च । वृद्धिपत्रनखशस्त्रमुद्रिकोत्पलपत्र-
कार्द्धधाराणि छेदने भेदने च । सूचीकुशपत्राटीमुख-
शरारीमुखान्तर्मुखत्रिकूर्चकानि विस्रावणे । कुठारीका-
व्रीहिमुखारावेतसपत्रकाणि व्यधने सूची च । वड़िशो
दन्तशङ्कुश्चाहरणे । एषण्येषणे आनुलोम्ये च ।
सूच्यः सीवने इत्यष्टविधे कर्मण्युपयोगः शस्त्राणां
व्याख्यातः । तेषामथ यथायोगग्रहणसमासोपायः
कर्मसु वक्ष्यते । तत्र वृद्धिपत्रं वृन्तफलसाधारणे भागे
ऽदृढीयाङ्गेदनान्येवं सर्वाणि । वृद्धिपत्रं मण्डलाग्रञ्च
किञ्चिदुत्तानपाणिना लेखने बहुशोऽवचार्यं वृन्तापे